सीतात्यागः

(रेडियोरूपकम् - Radio Play)

महाकविमुखाम्भोजमणिपञ्जरसारिकाम् ।
वेदाध्ययनकेलीषु व्योमस्थां वन्दे देवीं सरस्वतीम् ॥

(नान्द्यन्ते)

(निवेदकेन कन्नडभाषायां कथासन्दर्भनिरूपणम्)

सूत्रधारः - अलमतिविस्तरेण । अद्य खलु नभोवाणीसंस्कृतरूपकप्रसारमल्लिकायामार्यमिश्रान् निवेदयामि । अस्ति खलु पाण्डुरङ्ग कृष्णाचार्यनामा प्राचीनपण्डितः । स च वाल्मीकि-कृतिचौर्यचतुराणां कालिदासभवभूत्यादीनां परम्परामनुसृत्य सीतात्यागसन्दर्भमिमं नभोवाणीरूपकतया विन्यस्तवान् । तदिदं रूपकं प्रसारयितुं नभोवाणीश्रोतृवर्गेण आहूतोऽस्मि (चकित इव) अये गृहीतरामचन्द्रभूमिकः सन्निहित एवायं कृतिचोरः स्वरूपकप्रसाराय । हा कष्टं मया पुनः दुर्मुखभूमिकां गृहीत्वा पौरजानपदेषु किंवदन्ती राज्ञे निवेदनीया ।

(इति प्रस्तावना)

(निवेदकेन कन्नडभाषायां दुर्मुखेन वक्ष्यमाण-
किंवदन्त्याः संक्षेपतः निरूपणम्)

प्रथमः ध्वनितरङ्गः

(ततः प्रविशति दुर्मुखेन सह संलपन् रामभद्रः)

रामभद्रः - दुर्मुख ! ब्रूहि यदुपलब्धं पौरजानपदेषु ।

दुर्मुखः - उपस्तुवन्ति देवं पौरजानपदाः

अखिल कर्णाटक संस्कृत परिषत् (रि.)

AKHILA KARNATAK SANSKRIT PARISHAT

Administrative Office : No. 132/4, III Block, Jayanagar, Bangalore-560011

President
SRI VEERENDRA HEGGADE
Dharmadhikari, Dharmasthala

Chairman
PROF. K. T. PANDURANGI

Treasurer
Dr. D. N. SHANBHAG

General Secretary
S. KRISHNAMOORTHY

Organising Secretary
H. S. NAGABHUSHANA BHATTA

रामभद्रः - अर्थितद् एवः। दोषं तु मे कथितं कथय।

दुर्मुखः - (सास्रम्) देव! एवं किल जना वदन्ति

अङ्कमारोप्य तु पुरा रावणेन बलाद्धृताम्
लङ्कामपि पुरीं नीतामशोकवनिकां गताम्॥१॥
रक्षसां वशमापन्नां कथं रामो न कुत्सति।
अस्माकमपि दारेषु सहनीयं भविष्यति॥२॥
यथा हि कुरुते राजा प्रजास्तमनुवर्तते।
एवं बहुविधा वाचो वदन्ति पुरवासिनः॥३॥
नगरेषु च सर्वेषु राजन् जनपदेषु च
चत्वरापणरथ्यासु वनेषूपवनेषु च॥४॥

रामभद्रः - अहह! तीव्रसंवेगो वाग्वज्रः। तत् किमत्र मन्दभाग्यः करोमि।

(निर्वेदेन करुणाभाषायां रामस्य दशायाः उद्गाराणां च संक्षेपतो निरूपणम्)

रामभद्रः - अहह! तीव्रसंवेगो वाग्वज्रः। तत् किमत्र मन्दभाग्यः करोमि।

किमात्मनिर्वादकथामुपेक्षे जायामदोषामथ संत्यजामि।

अथवा किमन्यत्

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि
आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा॥

हा देवि! देवयजनसम्भवे!

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे॥

अखिल कर्णाटक संस्कृत परिषत् (रि.)

AKHILA KARNATAK SANSKRIT PARISHAT

Administrative Office : No. 132/4, III Block, Jayanagar, Bangalore-560011

President
SRI VEERENDRA HEGGADE
Dharmadhikari, Dharmasthala

Chairman
PROF. K. T. PANDURANGI

Treasurer
Dr. D. N. SHANBHAG

General Secretary
S. KRISHNAMOORTHY

Organising Secretary
H. S. NAGABHUSHANA BHATTA

(दुर्मुखं प्रति) दुर्मुख! ब्रूहि लक्ष्मणम्

प्रजावती दोहदशंसिनी ते तपोवनेषु स्पृहयालुरेव।
स एव रथी तदपदेशनेयां प्रापय्य वाल्मीकिपदं त्यजैनाम्॥

दुर्मुखः - हा देवि (निष्क्रान्तः)

रामभद्रः - हा कष्टम् अतिबीभत्सकर्मा नृशंसोऽस्मि संवृत्तः

शैशवात् प्रभृति पोषितां प्रियाम्।
सौहृदादपृथगाश्रयामिमाम्॥
~~[illegible]~~ छद्मना परिददामि मृत्यवे
शौनिको गृहशकुनिकामिव

हन्त विपर्यस्तः सम्प्रति जीवलोकः। अद्य पर्यवसितं ~~[illegible]~~ जीवितप्रयोजनं रामस्य। शून्यमधुना जीर्णारण्यं जगत्। असारः संसारः। कष्टप्रायं ~~[illegible]~~ शरीरम्। किं करोमि। का गतिः। क्व गच्छामि।

(निष्क्रान्तः)

द्वितीयः ध्वनितरङ्गः

(निवेदकेन कन्नडभाषायां लक्ष्मणेन सीतायाः वननयन-वृत्तान्तस्य संक्षेपतः निरूपणम्)

(ततः प्रविशति गर्भालसा रथेन सीता लक्ष्मणश्च)

लक्ष्मणः - (स्वगतम्) हा कष्टम्! ज्येष्ठस्य भ्रातुः नियोग-परवशेन मया अतिनृशंसमारब्धम्।

हन्त! न अहं भरतः शत्रुघ्नो वा ज्येष्ठस्य भ्रातुः निदेशं निषेद्धुं अनुमोदितुं वा समर्थः।

अखिल कर्णाटक संस्कृत परिषत् (रि.)

AKHILA KARNATAK SANSKRIT PARISHAT

Administrative Office : No. 132/4, III Block, Jayanagar, Bangalore-560011

President
SRI VEERENDRA HEGGADE
Dharmadhikari, Dharmasthala

Chairman
PROF. K. T. PANDURANGI

Treasurer
Dr. D. N. SHANBHAG

General Secretary
S. KRISHNAMOORTHY

Organising Secretary
H. S. NAGABHUSHANA BHATTA

अथवा कीदृशो निर्बन्धः यदा रामः स्वयमेव वदति –

अन्तरात्मा च मे वेत्ति सीतां शुद्धां यशस्विनीम्।

त्यजति च तामेव।

कीदृशं वा अनुमोदनं यदा रामो वदति –

अप्यहं जीवितं जह्यां युष्मान् वा पुरुषर्षभाः।
अपवादभयात् भीतः किं पुनः जनकात्मजाम्॥

हन्त

वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति॥

सीता – वत्स लक्ष्मण! सुरुचिरोऽयं वनप्रदेशः।
प्रियंवदो मे आर्यपुत्रः येन दोहदो मे सम्पादितः।

(स्वगतम्)

लक्ष्मणः – (हा कष्टम्! अशिवकृत्यं भर्तारमद्यापि कल्पद्रुमं मन्यते।

सीता – (निमित्तं सूचयित्वा) किमिदं वामाक्षि स्पन्दनम्।
नमो रघुकुलदेवताभ्यः। सानुजस्य मे भर्तुः शिवं भूयात्।

लक्ष्मणः – सुमन्त्र! रथं स्थापय भागीरथीतीरमुपस्थिता वयम्।

(रथावतरणरवः)

(निवेदकेन कन्यासाबायां लक्ष्मणेन सीतायै 'रामेण परित्यक्ता' इति रामनिर्देशकथनस्य सीतादुःखस्य च संक्षेपतः निरूपणम्)

अखिल कर्णाटक संस्कृत परिषत् (रि.)

AKHILA KARNATAK SANSKRIT PARISHAT

Administrative Office : No. 132/4, III Block, Jayanagar, Bangalore-560011

President
SRI VEERENDRA HEGGADE
Dharmadhikari, Dharmasthala

Chairman
PROF. K. T. PANDURANGI

Treasurer
Dr. D. N. SHANBHAG

General Secretary
S. KRISHNAMOORTHY

Organising Secretary
H. S. NAGABHUSHANA BHATTA

तृतीयः ध्वनितरङ्गः

सीता - एषा प्रसन्नपुण्यसलिला भगवती भागीरथी

लक्ष्मणः - आर्ये! सन्नद्धेयं नौः निषादेन आहृता।
अपरं तावत् पारं गमिष्यावः

(नौका गङ्गातरणरवः)

सीता - वत्स लक्ष्मण! कस्येदमाश्रमपदम्?

लक्ष्मणः - भगवतो वाल्मीकेः। (सगद्गदम्) आर्ये! पराधीनस्य मे दौष्ट्यं क्षमस्व। रक्षसो गृहे स्थितत्वात् त्वयि प्राप्तचारित्रसन्देहो लोकः। कलङ्कं चेदं तव त्यागेन राजा परिमार्ष्टुमिच्छति।

सीता - हा हतास्मि (मूर्च्छति)

लक्ष्मणः - आर्ये समाश्वसिहि समाश्वसिहि। क्षमस्व मे दौष्ट्यम् (पादयोः पतति)

सीता - (संज्ञां लब्ध्वा) सौम्य! त्वं भ्रात्रा परवानसि।
किन्तु

वाच्यस्त्वया मद्वचनात् स राजा वह्नौ विशुद्धामपि
यत् समक्षम्।

मां लोकवादश्रवणादहासीः श्रुतस्य तत् किं सदृशं कुलस्य॥

कल्याणबुद्धेरथवा तवायं न कामचारो मयि शङ्कनीयः

ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्यः॥

किंवा तवात्यन्तवियोगमोघे कुर्यामुपेक्षां हतजीवितेऽस्मिन्।

स्याद्रक्षणीयं यदि मे न तेजः त्वदीयमन्तर्गतमन्तरायः॥

अखिल कर्णाटक संस्कृत परिषत् (रि.)

AKHILA KARNATAK SANSKRIT PARISHAT

Administrative Office : No. 132/4, III Block, Jayanagar, Bangalore-560011

President
SRI VEERENDRA HEGGADE
Dharmadhikari, Dharmasthala

Chairman
PROF. K. T. PANDURANGI

Treasurer
Dr. D. N. SHANBHAG

General Secretary
S. KRISHNAMOORTHY

Organising Secretary
H. S. NAGABHUSHANA BHATTA

नृपस्य वर्णाश्रमपालनं यत्स एव धर्मो मनुना प्रणीतः।
निर्वासिताप्येवमतस्त्वयाहं तपस्विसामान्यमवेक्षणीया।
श्वश्रूजनं सर्वमनुक्रमेण विज्ञापय प्रापितमत्प्रणामः।
प्रजानिषेकं मयि वर्तमानं सूनोरनुध्यायत चेतसेति॥

लक्ष्मणः - तथा (निष्क्रान्तः)

सीता - (मुक्तकण्ठं रोदिति) हा आर्यपुत्र! हा लक्ष्मण!
हा अम्ब पृथिवि! हा भगवति भागीरथि!

(निवेदकेन कन्नडभाषायां वाल्मीकेः आगमनस्य
सीतासान्त्वनस्य च संक्षेपतः निवेदनम्)

(ततः प्रविशति वाल्मीकिः)

वाल्मीकिः - (श्रुत्वा) अये

कथं वने लक्ष्मण लक्ष्मणेति दीनाक्षरं रोदिति
योषिदुच्चैः।

महति च अस्याः शोकावेगे निखिलमरण्यं
समदुःखभावापन्नमिव। तथाहि

नृत्यं मयूराः कुसुमानि वृक्षाः दर्भानुपात्तान् विसृजन्ति
मृग्यः।
अस्याः प्रपन्ने समदुःखभावमत्यन्तमेतद्रुदितं वनेऽपि

(निरूप्य) आँ ज्ञातम्। जनकात्मजा एषा।

वत्से!
जाने विसृष्टां प्रणिधानतस्त्वां मिथ्यापवादक्षुभितेन भर्त्रा
तन्मा व्यथिष्ठा विषयान्तरस्थं प्राप्तासि वैदेहि
पितुर्निकेतम्।

अखिल कर्णाटक संस्कृत परिषत् (रि.)

AKHILA KARNATAK SANSKRIT PARISHAT

Administrative Office : No. 132/4, III Block, Jayanagar, Bangalore-560011

President
SRI VEERENDRA HEGGADE
Dharmadhikari, Dharmasthala

Chairman
PROF. K. T. PANDURANGI

Treasurer
Dr. D. N. SHANBHAG

General Secretary
S. KRISHNAMOORTHY

Organising Secretary
H. S. NAGABHUSHANA BHATTA

उत्खातलोकत्रयकण्टकेऽपि सत्यप्रतिज्ञेऽप्यविकत्थनेऽपि
त्वां प्रत्यकस्मात् कलुषप्रवृत्तावस्त्येव मन्युः
भरताग्रजे मे।

तपस्विसंसर्गविनीतसत्त्वे मे तपोवने
वीतभया वस। तत्र ते अपत्यस्य संस्कारो भविष्यति।

सीता- प्रणम्य त्वत्कृते अनुगृहीतास्मि। मदन्तर्गतं रघुकुलस्य
तेजो रक्षणीयम्। नमो नमस्ते तपोधनाय

वाल्मीकिः- वत्से किं ते भूयः प्रियमुपकरोमि

सीता- किमतः परमस्ति। अनुगृहाण मां
भूयो यथा मे जन्मान्तरेऽपि स एव भर्ता
न च विप्रयोगः।

इदमपि चास्तु

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले
तावद्रामायणकथा भुवनेऽत्र विराजताम्॥

अखिल कर्णाटक संस्कृत परिषत् (रि.)

AKHILA KARNATAK SANSKRIT PARISHAT

Administrative Office : No. 132/4, III Block, Jayanagar, Bangalore-560011

President
SRI VEERENDRA HEGGADE
Dharmadhikari, Dharmasthala

Chairman
PROF. K. T. PANDURANGI

Treasurer
Dr. D. N. SHANBHAG

General Secretary
S. KRISHNAMOORTHY

Organising Secretary
H. S. NAGABHUSHANA BHATTA